## ॥ উপনিষচ্ছাস্ত্রানুসারিশ্রবণমনননিদিধ্যাসনৈরেব মুমুক্ষোঃ পরমার্থতত্ত্বজ্ঞানম্ ॥

অপরোক্ষভ্রমস্তু ব্রহ্মবিষয়কাঽপরোক্ষজ্ঞানেনৈব নিরস্যো ভবতি, নান্যথেতি নিয়মেন ব্রহ্মবিষয়কাজ্ঞানবশাদ্ যঃ প্রপঞ্চভ্রমোঽপরোক্ষো ভবতি, স ত্বপরোক্ষব্রহ্মজ্ঞানাদেব নিরস্যতে, নান্যথা। অতএবাঽদ্বৈতিভিরপরোক্ষব্রহ্মতত্ত্বসাক্ষাৎকারার্থং শ্রবণাদিকং শ্রুতিস্মৃতিযুক্ত্যাদিকমবলম্ব্যাভ্যুপগতম্। তচ্চ শ্রবণাদিকং যদি শ্রুতিবিরুদ্ধং স্যাত্তদা নৈব প্রামাণিকং ভবেদিতি কৃত্বা তচ্ছ্রবণাদের্মূলং বার্হদারণ্যকবচনমিত্যুক্তম্। তথাহি – 'আত্মা বা অরে দ্রষ্টব্যঃ শ্রোতব্যো মন্তব্যো নিদিধ্যাসিতব্যঃ' (বৃ.উ. ২।৪।৫, ৪।৫।৬) ইতি বার্হদারণ্যকবাক্যমদ্বৈতিভিঃ প্রমাণরূপেণোপস্থাপয়ন্তি। "শ্রোতব্যঃ শ্রুতিবাক্যেভ্যো মন্তব্যশ্চোপপত্তিভিঃ। মত্বা চ সততং ধ্যেয় এতে দর্শনহেতবঃ ॥" ইত্যাদি পুরাণবচনং বিবরণপ্রমেয়কারৈরুপন্যস্তম্ (বিব.প্র., ভিজিয়ানাগ্রাম সং., পৃ. ১)।

তত্র শমদমাদিসাধনসম্পন্নঃ সর্ববিষয়বিরক্তো মুমুক্ষুর্ব্রহ্মজ্ঞানার্থং শ্রোত্রিয়ং ব্রহ্মনিষ্ঠং গুরুমুপসাদ্য যোগ্যশ্রবণমনননিদিধ্যাসনৈর্ব্রহ্মবিষয়কাপ্রতিপত্ত্যন্যথাপ্রতিপত্তিবিপ্রতিপত্তীর্দূরীকৃত্য স্বাত্মস্বরূপং ব্রহ্মরূপং জানাতি। যাবচ্চৈতাদৃশং ব্রহ্মজ্ঞানং ন ভবতি, তাবৎ স এব জীবঃ সুখদুঃখশোকমোহপ্রমাতৃত্বকর্তৃত্বভোক্তৃত্বাদিকমনুভূয় স্বাত্মস্বরূপজ্ঞানমননুভূয় সর্বানর্থমশ্নুতে। ব্রহ্মবিদ্গুরূপদিষ্টমার্গেণ প্রবর্তিতঃ সন্

স্বাত্মানমদ্বিতীয়ং ব্রহ্মরূপং বিজানাতীত্যদ্বৈতিনাং মতম্ ।

শমদমাদিসম্পন্নমুমুক্ষোর্ব্রহ্মবিদ্গুরুমুখাধীনতত্ত্বমস্যাদিমহাবাক্যশ্রবণসমনন্তরমেব ব্রহ্মাত্মাবগতির্ভবিতুমর্হতি কিন্তু, প্রায়েণ ন তথা ভবতি, অধিকারিতারতম্যাৎ । অতএব তাদৃশস্থলে শ্রবণাৎ পরং মনননিদিধ্যাসনয়োরাবশ্যকত্বমস্তি । অনেনৈব হেতুনা 'শ্রোতব্যঃ' ইত্যস্মাৎ পরং 'মন্তব্যো নিদিধ্যাসিতব্যঃ' ইত্যুপদিষ্টং শ্রুত্যা । তদুক্তং ব্রহ্মসূত্রশাঙ্করভাষ্যে, "ভবেদানর্থক্যং তং প্রতি যস্তত্ত্বমসীতি সকৃদুক্তমেব ব্রহ্মাত্মত্বমনুভবিতুং শক্নুয়াৎ । যস্তু ন শক্নোতি তংপ্রত্যুপযুজ্যত এবাবৃত্তিঃ" (ব্র.সূ.শা.ভা., নি.সা.সং., পৃ.৮২৯) ইতি ।

অত্র শ্রবণং নাম বেদান্তবাক্যানামদ্বিতীয়ে ব্রহ্মাত্মনি বাক্যতাৎপর্যনির্ধারণানুকূলবিচারঃ । বিবরণাচার্যাণাং মত এতাদৃশং শ্রবণং মানসব্যাপার এব । মননঞ্চ শব্দাবধারিতেঽর্থে মানান্তরবিরোধশঙ্কায়াং তন্নিবর্হণানুকূলতর্কাত্মকজ্ঞানজনকো মানসব্যাপারঃ । নিদিধ্যাসনঞ্চ অনাদিকামবাসনয়া বিষয়েষ্বাকৃষ্যমাণস্য চিত্তস্য বিষয়েভ্যঃ পরাবৃত্ত্যাত্মবিষয়কস্থৈর্যানুকূলো মানসব্যাপারঃ । ভামতীকারমতে তু শ্রবণমনননিদিধ্যাসনানি সর্বং জ্ঞানমেব । 'শ্রুতে মতে বিজ্ঞাতে' (বৃ.উ. ৪। ৫। ৬), 'শ্রবণেন মত্যা বিজ্ঞানেন' (বৃ.উ. ২। ৪। ৫) ইত্যাদিশ্রুতিভ্য এবমেবার্থাবধারণাৎ । তত্র সমুদিতেঽপি তত্ত্বজ্ঞানে মিথ্যাপ্রত্যয়সংস্কারো নাপগচ্ছতীতি যৎ প্রসংখ্যানবাদিমতং, তন্ন যুক্তং, যতো হি তত্ত্বজ্ঞানে সমুদিতে

ধ্বস্তে চাজ্ঞানে নৈব তত্র কিমপি ভ্রান্তিজ্ঞানং সংস্কারাদিরূপং স্যাদিতি, ন বা তত্র কোঽপি ক্রমো যুজ্যতে। অতএবোক্তমাচার্যশঙ্করপাদৈঃ "সকৃদুৎপন্নৈব হ্যাত্মপ্রতিপত্তিরবিদ্যাং নিবর্তয়তীতি নাত্র কশ্চিদপি ক্রমোঽভ্যুপগম্যতে।" (ব্র.সূ., শা.ভা., নি.সা.সং, পৃ.৮৩০) ইত্যাদিকম্।

'তন্ত্বৌপনিষদং পুরুষং পৃচ্ছামি' (বৃ.উ. ৩।৯।২৬) ইত্যাদিশ্রুতেস্তত্ত্বমস্যাদিমহাবাক্যশ্রবণমেব ব্রহ্মসাক্ষাৎকারে প্রধানং কারণং, তদেব চাঙ্গি। তদর্থমধিকারিতারতম্যেন মননং নিদিধ্যাসনঞ্চাঙ্গরূপেণ বিহিতমপ্রতিপত্ত্যন্যথাপ্রতিপত্তিবিপ্রতিপত্তিনিরাসার্থম্। তদুক্তং পঞ্চপাদিকায়াং "মনননিদিধ্যাসনাভ্যাং ফলোপকার্যাভ্যাং সহ শ্রবণং নামাঙ্গি বিধীয়তে" (বিব., বারাণসী সং., পৃ.৩) ইতি।

বস্তুতস্তু, অদ্বৈতব্রহ্মতত্ত্বং শ্রুতিসম্মতং, তথা শ্রুত্যনুসারিমন্বাদিস্মৃতিসম্মতঞ্চ। অদ্বৈতবাদসম্মতমুক্তেঃ স্বরূপমপি তত্র বহুধোল্লিখিতং মানবধর্মশাস্ত্রাদৌ। তদুক্তং, "স বিধূয়েহ পাপ্মানং পরং ব্রহ্মাধিগচ্ছতি।" (ম.সং.৬।৮৫) ইত্যাদিকম্। শাস্ত্রীয়ব্যাপারে শাস্ত্রমেব প্রমাণমিতি তাদৃশাদ্বৈততত্ত্বজ্ঞানার্থং কিং করণীয়মিতি শ্রুত্যাদিভির্বিস্পষ্টমেবোপদিষ্টম্। 'তং পশ্যতে নিষ্কলং ধ্যায়মানম্' (মু.উ. ৩।১।৮) ইত্যাদিকম্। 'তন্ত্বৌপনিষদং পুরুষং পৃচ্ছামি' ইত্যাদিশ্রুতিস্ত্বদ্বৈতব্রহ্মণ

উপনিষন্মাত্রবেদ্যত্বং শ্রাবয়তি। তত্রাপি 'আত্মা বা অরে দ্রষ্টব্যঃ শ্রোতব্যো মন্তব্যো নিদিধ্যাসিতব্যঃ' ইতি বার্হদারণ্যকমৈত্রেয়ীব্রাহ্মণানুগতশ্রুতিরদ্বৈতব্রহ্ম-বিজ্ঞানার্থং শ্রবণাদিকং বিদধাতি। অতএব ব্রহ্মদর্শনমুদ্দিশ্য শ্রবণাদৌ বিধির্বি-বরণাচার্যপ্রভৃতিভিঃ স্বীকৃতঃ। কিন্তু তত্ত্বমস্যাদিমহাবাক্যশ্রবণমাত্রেণৈব প্রায়েণ নৈব ব্রহ্মদর্শনং ভবতি, অধিকারিতারতম্যাদেব। যাবদ্ব্রহ্মবিষয়কাঃ প্রতিপত্ত্যন্য-থাপ্রতিপত্তিবিপ্রতিপত্তয়ো ন দূরীক্রিয়ন্তে, তাবচ্ছ্রবণমাত্রেণ নৈব ব্রহ্মজ্ঞানং স্ফুরতি। অতএবাপ্রতিপত্ত্যাদিদূরীকরণার্থং মনননিদিধ্যাসনয়োরেকান্তত আবশ্যকম্। দূরীকৃতে চান্যথাপ্রতিপত্ত্যাদৌ তত্ত্বমস্যাদিমহাবাক্যশ্রবণেনৈব ব্রহ্মস্বরূপোপলব্ধির্ভবতি। তস্মাৎ তচ্ছ্রবণাদ্যর্থং সাধনসম্পত্তিসম্পন্নেন যোগ্যেন মুমুক্ষুণা ব্রহ্মবিদাচার্যসকাশং গন্তব্যমেব। অতএব শ্রুতির্বিদধাতি, 'তদ্বিজ্ঞানার্থং স গুরুমেবাভিগচ্ছেৎ সমিৎপাণিঃ শ্রোত্রিয়ং ব্রহ্মনিষ্ঠম্॥' (মু. উ. ১।২।১২) ইত্যাদিকম্।

তস্মাদ্ যথাদ্বৈতব্রহ্মজ্ঞানং তাদৃশং তত্ত্বংবোপনিষন্মাত্রবেদ্যং, তথৈব তদ্বিজ্ঞানার্থং সাধনমপি তত্ত্বমস্যাদিমহাবাক্যশ্রবণাদিকমুপনিষদুপদিষ্টমেব। তদ্বিজ্ঞানেন চ সর্ববন্ধবিমুক্তিরিত্যপ্যুপনিষদুপদিষ্টমেব। 'তমেব বিদিত্বাতিমৃত্যু-মেতি' (শ্বে. উ. ৩।৮, ৬।১৫), 'তরতি শোকমাত্মবিৎ' (ছা. উ. ৭।১।৩), 'ভিদ্যতে হৃদয়গ্রন্থিশ্ছিদ্যন্তে সর্বসংশয়াঃ। ক্ষীয়ন্তে চাস্য কর্মাণি তস্মিন্ দৃষ্টে পরাবরে।'

[মু.উ. ২।২।৮], 'তত্র কো মোহঃ কঃ শোক একত্বমনুপশ্যতঃ' (ঈ.উ.৭) ইত্যাদিশ্রুতয়স্তত্র প্রমাণম্। এতাদৃশশ্রুতয়ঃ প্রাগেবোল্লিখিতা ইতি নেহ পুনরুল্লিখ্যন্তে।

অত্রান্তঃকরণবৃত্ত্যা তত্তদ্বিষয়কমজ্ঞানং ধ্বস্তং ভবতি, নান্যথেত্যদ্বৈতিনাং মতম্। যথা হি ঘটাকারান্তঃকরণবৃত্ত্যা ঘটবিষয়কমজ্ঞানং ধ্বস্তং ভবতি, ঘটজ্ঞানঞ্চ জায়তে, এবমেব ব্রহ্মাকারান্তঃকরণবৃত্তাবুদিতায়াং তদ্বিষয়কমজ্ঞানং ধ্বস্তং ভবতি, ব্রহ্মজ্ঞানঞ্চ সমুদেতীত্যদ্বৈতরাদ্ধান্তঃ। অদ্বৈতরত্নরক্ষণে শ্রীমন্মধুসূদনসরস্বতীপাদৈঃ ক্রমঃ কশ্চিৎ প্রদর্শিতঃ। স চ ক্রম ইত্থম্ - "শব্দাৎ প্রথমতোঽপরোক্ষজ্ঞানং জায়তে বিচারপ্রযোজকম্। তদনন্তরমসম্ভাবনোদয়ে সতি বিচারশাস্ত্রং প্রবর্ত্ততে। তচ্চ বেদান্তানাং ব্রহ্মণ্যদ্বিতীয়ে সমন্বয়প্রতিপাদনদ্বারা পরপক্ষখণ্ডনদ্বারা চোপযুজ্যতে। প্রমাণগতাঽসম্ভাবনা শ্রবণনিবর্ত্ত্যা প্রমেয়গতাঽসংভাবনা তু মননিবর্ত্ত্যেত্যন্যত্র বিস্তরঃ। তদনন্তরমপি বিপরীতভাবনা তিষ্ঠত্যেব, সা নিদিধ্যাসনেন নিরাক্রিয়তে, তদনন্তরং পুনরপি মহাবাক্যমনুসন্ধীয়মানমবিদ্যানির্মূলনসমর্থমন্তঃ-করণবৃত্তিভেদরূপং মুক্তিফলকং সাক্ষাৎকারমুৎপাদয়তি" (অ.র, দিল্লী সং., পৃ. ৪৪-৪৫) ইত্যাদিকম্।

তত্র শ্রবণাদেরেব ব্রহ্মবিজ্ঞানার্থমুপযোগিত্বম্, উপনিষদুক্তপ্রমাণানামেবোপনিষন্মাত্রবেদ্যে ব্রহ্মণি প্রামাণ্যং, ন তু প্রত্যক্ষানুমানাদেরিত্যপ্যস্মাভিরত্র প্রদর্শনীয়ম্, অন্যথা ব্রহ্মণোঽপরোক্ষজ্ঞানে প্রত্যক্ষাদিপ্রমাণানামপি সাক্ষাদুপযোগিত্বং ভবিতুমর্হতীত্যেবং শঙ্কা স্যাদেব। অতএব তৎপ্রদর্শনার্থমস্মাভিরালোচনং কর্তব্যমিত্যুত্তরস্মিন্ গ্রন্থে তদালোচ্যতে।

## ॥ প্রত্যক্ষানুমানাদিপ্রমাণানি নৈব মুক্তিসাধনানি ভবিতুমর্হন্তি ॥

'যৎ সাক্ষাদপরোক্ষাদব্রহ্ম' (বৃ. উ. ৩। ৪। ১) ইতি শ্রুতের্ব্রহ্মণোঽপরোক্ষত্বমেব জ্ঞায়তে। তেন তদ্‌ব্রহ্মবিজ্ঞানার্থং বিশেষেণ সর্বজ্যেষ্ঠপ্রমাণং প্রত্যক্ষং কথং তত্র প্রযুক্তং ন স্যাৎ, কথং বা প্রত্যক্ষাদপেক্ষানুমানাদিপ্রমাণানামপি তত্র প্রসরো ন ভবেদিতি সম্যগ্‌বিবেচনীয়মেব, অন্যথা, অদ্বৈতব্রহ্মণ উপনিষন্মাত্রবেদ্যত্বং নৈব প্রতিপাদিতং স্যাদিতি শ্রুতিবৈয়র্থ্যাপত্তিঃ, প্রত্যক্ষাদিপ্রমাণগম্যত্বে চ ব্রহ্মণঃ ইন্দ্রিয়গ্রাহ্যত্বেনাপি 'যতো বাচো নিবর্তন্তে অপ্রাপ্য মনসা সহ' (তৈ. উ. ২। ৪। ১) ইত্যাদিশ্রুতিবিরোধঃ, ব্রহ্মণোঽনিত্যতাপত্তিশ্চ।

তত্রাদ্বৈতিভিস্ত্রিবিধাঃ সত্তাঃ স্বীকৃতাঃ - পারমার্থিকসত্তা, ব্যাবহারিকসত্তা, প্রাতিভাসিকসত্তা চেতি। পারমার্থিকসত্তা ব্রহ্মণঃ, ব্যাবহারিকসত্তা বিশ্বপ্রপঞ্চস্য, প্রাতিভাসিকসত্তা শুক্তিরজতাদিপ্রাতিভাসিকবস্তুনঃ প্রতিভাসমাত্রশরীরস্য। প্রতিভাসকালে শুক্তিরজতাদেস্তাৎকালিকং জ্ঞানং তাৎকালিকসত্তা চাস্ত্যেবেতি যাবৎপ্রতিভাসংতাদৃশশুক্তিরজতাদেরবাধিতত্বমস্ত্যেব, যদ্যপ্যাবিদ্যকোঽয়ং প্রতিভাসঃ। অধিষ্ঠানতত্ত্বজ্ঞানং যাবন্ন ভবতি, তাবৎকালপর্যন্তমযং প্রতিভাসো নিরাবাধমেব তিষ্ঠতি। অধিষ্ঠানতত্ত্বজ্ঞানমাত্রেণৈবাস্য প্রতিভাসস্য নাশো ভবতি। বস্তুগত্যা তু, ব্যাবহারিকাধিষ্ঠানশুক্তিজ্ঞানেনৈব রজতপ্রতিভাসো বাধ্যতে। তেন

প্রাতিভাসিকজ্ঞানং ব্যাবহারিকজ্ঞানেন বাধিতং ভবতীতি নিশ্চীয়তে ।

ব্যাবহারিকসত্তা তু যা বিশ্বপ্রপঞ্চস্য, সা পারমার্থিকসত্তাজ্ঞানেন নিবর্ত্তিতা ভবতি । পারমার্থিকসত্তা চ শুদ্ধস্যৈব ব্রহ্মা ইতি শুদ্ধব্রহ্মবিজ্ঞানেনৈব ব্যাবহারিকবিশ্বপ্রপঞ্চস্য বাধো ভবতি, নান্যথা । শুদ্ধচৈতন্যঞ্চ ব্যাবহারিক-বিশ্বপ্রপঞ্চস্যাধিষ্ঠানম্ ।

অতএব বিশ্বপ্রপঞ্চো যঃ প্রত্যক্ষবিষয়ো যশ্চানুমানাদিপ্রমাণবিষয়োঽপি, তজ্জ্ঞানমাত্রং পারমার্থিকব্রহ্মজ্ঞানমবাধিতমেব তিষ্ঠতি । ব্যাবহারিকশ্চ বিষয়প্রপঞ্চঃ প্রত্যক্ষাদিপ্রমাণবিষয় ইন্দ্রিয়গ্রাহ্যশ্চ । পারমার্থিকন্তু ব্রহ্ম ইন্দ্রিয়াদ্যতীতং, 'যতো বাচো নিবর্ত্তন্তে অপ্রাপ্য মনসা সহ' (তৈ. উ. ২। ৪। ১) ইত্যাদিশ্রুতেঃ । তেন নৈব শুদ্ধং ব্রহ্ম প্রত্যক্ষাদিপ্রমাণগোচরম্ । অতএব প্রত্যক্ষাদিকং পারমার্থিক-ব্রহ্মজ্ঞানায় নোপযুজ্যত ইতি নৈব প্রত্যক্ষাদিপ্রমাণানাং মোক্ষার্থং ব্রহ্মজ্ঞানায় সাধনত্বমস্তি ।

নৈতাবতা শ্রুতিপ্রত্যক্ষয়োর্বিরোধোঽপি সম্ভবতি, যতো হি ব্যাবহারিকদশায়াং প্রত্যক্ষাদেঃ প্রামাণ্যমব্যাহতমেব, ন তত্র শ্রুত্যা প্রত্যক্ষাদিবাধঃ প্রত্যক্ষাদিবিরোধো বা । পারমার্থিকদশায়ান্তু প্রত্যক্ষাদেরনুপযোগ্যতয়াঽপ্রামাণ্য-মিতি তত্রৈব প্রত্যক্ষাদের্বাধো বিরোধশ্চ, শ্রুতেরেব তত্র প্রামাণ্যাৎ । তেন

মোক্ষায় ব্রহ্মজ্ঞানার্থং প্রত্যক্ষাদিপ্রমাণানামসামর্থ্যাদনুপযুক্তানি, শ্রুতিস্তু তত্র যোগ্যত্বেনোপযুজ্যত ইতি পারমার্থিকতত্ত্বপ্রতিপাদনদশায়ামেব শ্রুতিপ্রত্যক্ষয়োর্বিরোধঃ, ন তু ব্যাবহারিকদশায়ামিতি বেদ্যম্ ।

প্রত্যক্ষাদিপ্রমাণং ন কেবলং বিষয়েন্দ্রিয়াদিগোচরকং, পরন্তু, নানাদোষদুষ্টত্বান্নৈব সর্বথা সর্বদা গ্রাহ্যম্ । প্রত্যক্ষাদিপ্রমাণেনোপস্থাপিতস্য বিষয়স্য প্রামাণ্যে "মরুষু মরীচিচয়মুচ্চাবচমুচ্ছলত্তুঙ্গতরঙ্গভঙ্গমালেয়মভ্যর্ণমবতীর্ণা মন্দাকিনীত্যভিসন্ধায় প্রবৃত্তো ভ্রাম্যমাণোঽপি পিপাসামুপশময়েৎ ।" (ভা. নি. সা. সং., পৃ. ১২), ন তু তথা ভবতি । অতএব ব্যাবহারিকদশায়ামপি প্রত্যক্ষাদিকং প্রমাণং দুষ্টং ভবতীতি লক্ষ্যতে ।

অনুমিতৌ লিঙ্গলিঙ্গিজ্ঞানস্যাপরিহার্যত্বাৎ, প্রত্যক্ষগ্রাহ্যত্বেন পরাগ্ভূতত্বাচ্চ লিঙ্গস্য, ব্রহ্মণশ্চ প্রত্যগ্ভূতত্বাদ্ ব্রহ্মণা নিয়তসম্বন্ধস্য কস্যচিদভাবান্নৈবানুমিতিরপি ব্রহ্মজ্ঞানে কথমপি পদং লব্ধুং পারয়তি । তদুক্তং নৈষ্কর্ম্যসিদ্ধিকৃদ্ভিঃ, "দিদৃক্ষিতপরিচ্ছিন্নপরাগরূপাদিসংশ্রয়াৎ । বিপরীতমতো দৃষ্ট্যা স্বতো বুদ্ধং ন পশ্যতি ॥" (নৈ. সি. পু. সং., পৃ. ২৩৫, শ্লো. ৩।৪৯) ইতি, "প্রত্যক্ষস্য পরাগ্ভানান্ন সম্বন্ধগ্রহণং যতঃ । আত্মনোঽতো হ্যনুমিত্যাভিভবো ন কথঞ্চন ॥" (নৈ. সি., শ্লো. ৩।৫১ পৃ. ১৩৬) ইতি চ । এবংরূপেণ প্রধানমল্লনিবর্হণন্যায়েন

প্রত্যক্ষানুমানয়োর্ব্রহ্মণি প্রামাণ্যে নিরাকৃতে সর্বাণ্যপীতরপ্রমাণানি অত্র নিরাকৃতানি ভবন্তীতি বেদিতব্যম্ ।

কিঞ্চ, উৎপত্তৌ প্রত্যক্ষাদ্যপেক্ষত্বেঽপি জ্ঞপ্তৌ কস্যাপি প্রমাণস্য অথাঽঽম্নায়স্য চ প্রত্যক্ষনিরপেক্ষ্যেণ প্রমিতৌ ন প্রত্যক্ষাদ্যপেক্ষত্বম্ । নানাদোষ-কলঙ্কিততয়া প্রত্যক্ষস্য দৌর্বল্যম্, অপৌরুষেয়ত্বেন স্বতঃসিদ্ধপ্রমাণভাবতয়া সর্বদোষরহিতত্বেন চ শ্রুতেঃ প্রাবল্যাদ্ ব্রহ্মণি শ্রুতিরেব প্রমাণং, ন তু প্রত্যক্ষাদিকং কিমপি । তদুক্তং ব্রহ্মসিদ্ধৌ, "ইতশ্চ সম্ভবদ্বিচিত্রবিভ্রমহেতুত্বাৎ প্রত্যক্ষাদীনাম্, বিগলিতনিখিলদোষাশঙ্কত্বাচ্চাম্নায়স্য পুরুষাশ্রয়াণাং হি দোষাণাং শব্দে পুরুষাভাবেঽসম্ভবাৎ" (ব্র. সি., মা. সং., পৃ. ৪০) ইতি । ভামতীকৃদ্ভিরপ্যুক্তম্, "অস্যাপৌরুষেয়তয়া নিরস্তসমস্তদোষাশঙ্কস্য, বোধকতয়া স্বতঃসিদ্ধপ্রমাণভাবস্য স্বকার্যে প্রমিতাবনপেক্ষত্বাৎ" (ভা., নি. সা. সং., পৃ. ৬) ইতি । অতএব পারমার্থি-কাদ্বৈতব্রহ্মজ্ঞানার্থং তত্ত্বমস্যাদিমহাবাক্যার্থজ্ঞানমেবাবশ্যকং, ন তু প্রত্যক্ষাদিকম্ । ন চ, অথাপি তু, শাস্ত্রাদীনামপ্যপারমার্থিকত্বাৎ কথং ততঃ পারমার্থিকজ্ঞানোৎপত্তিঃ স্যাদিতি শঙ্ক্যম্, অতাত্ত্বিকপ্রমাণভাবেভ্যোঽপি তাত্ত্বিকপ্রমাদর্শনাৎ । তদুক্তং, "নায়ং নিয়মঃ — অসত্যং ন কস্মৈচিৎ কার্যায় ভবতীতি, ভবতি হি মায়া প্রীতের্ভয়স্য চ নিমিত্তম্, অসত্যং চ সত্যপ্রতিপত্তেঃ,

যথা রেখাগবয়া লিপ্যক্ষরাণি চ।” (ব্র.সি., মা.সং., পৃ.১৪), ভামতীকৃদ্ভিরপ্যুক্তম্ “তথা চ বর্ণে হ্রস্বদীর্ঘত্বাদয়োঽন্যধর্মা অপি সমারোপিতাস্তত্ত্বপ্রতিপত্তিহেতবঃ।” (ভা., নি.সা.সং., পৃ.৭) ইত্যাদিকম্।

অত্র ব্যবহারিকদশায়াং প্রত্যক্ষাদিপ্রমাণানাং প্রামাণ্যং ‘দেহাত্মপ্রত্যয়ো যদ্বৎ প্রমাণত্বেন কল্পিতঃ। লৌকিকং তদ্বদেবেদং প্রমাণং ত্বাঽঽত্মনিশ্চয়াৎ॥” (ব্র. সূ.শা.ভা., নি.সা.সং., পৃ.৯৯) ইত্যাদিসুন্দরপাণ্ড্যাচার্যবচনসহযোগেন শ্রীশঙ্করাচার্যপাদাদিভিরঙ্গীকৃতম্। অদ্বৈতসিদ্ধিকৃদ্ভিরপ্যুক্তম্, “প্রত্যক্ষাদের্ব্যাবহারিকং প্রামাণ্যং, শ্রুতেস্তু তাত্ত্বিকম্।” (অ.সি.নি.সং.পৃ.৬৮৪) ইতি। কিঞ্চ, ‘ন দৃষ্টের্দ্রষ্টারং পশ্যের্ন শ্রুতেঃ শ্রোতারং শৃণুয়াঃ’ (বৃ. উ. ৩।৪।২), ‘যত্র ত্বস্য সর্বমাত্মৈবাভূত্তৎ কেন কং পশ্যেৎ’ (বৃ.উ. ৪।৫।১৫) ইত্যাদিশ্রুতিভিঃ পরমার্থভূতেঽদ্বিতীয়ে ব্রহ্মণি প্রত্যক্ষাদিপ্রমাণব্যাপারস্য বৈয়র্থ্যমেবোক্তম্।

অতএবৈতাদৃশে ব্রহ্মণি নৈব প্রত্যক্ষাদিপ্রমাণাপেক্ষা কাপ্যস্তি, পরন্তু, তত্ত্বমস্যাদিমহাবাক্যানাং শ্রবণাদিকমেবাত্রাঽজ্ঞাননাশেন পরমার্থতত্ত্বজ্ঞানায় কারণমিত্যঙ্গীকার্যম্। অতএবোক্তং সংক্ষেপশারীরকে, “অতোঽস্তু রূপাদিবিহীন-রূপে প্রমাণান্তরাগোচরচিৎস্বরূপে। বচঃ প্রমাণান্তরনিঃস্পৃহং সৎ প্রমাণমত্রাঽঽত্মনি নির্বিবাদম্॥” (সং.শা., অহমদাবাদ সং., পৃ. ১৬৮ শ্লো. ১।২৭) ইতি।

ভগবৎপাদশ্রীশঙ্করাচার্যৈরপ্যুক্তং, "বাক্যার্থবিচারণাধ্যবসাননির্বৃত্তা হি ব্রহ্মাবগতিঃ, নানুমানাদিপ্রমাণান্তরনির্বৃত্তা।" (ব্র.সূ.শা.ভা., নি.সা.সং., পৃ. ৫০-৫১) ইতি চ।

তত্রাধ্যারোপাপবাদন্যায়েনাত্মনি প্রপঞ্চং সমারোপ্য তদপবাদেন সর্বব্যবহারাতীতং ব্রহ্মেতি শ্রুতিস্মৃতীতিহাসপুরাণযুক্তিভিরদ্বৈতাচার্যৈঃ সুদৃঢ়ং প্রতিষ্ঠাপিতম্। তত্র শ্রৌতং প্রমাণমন্যৎসর্বপ্রমাণাতীতম্। পরমতত্ত্বাবধানেনৈব প্রমাণপ্রমেয়াদিব্যবহারনাশঃ। শাস্ত্রপ্রমাণকমপি ব্রহ্মতত্ত্বং তর্কেণ সুদৃঢ়ীক্রিয়তে ইতি তর্কস্যাপি তত্র স্থানমস্তি। অতএব 'শ্রোতব্যঃ' ইত্যস্মাৎ পরং 'মন্তব্যঃ' ইত্যুক্তং শ্রুতৌ। তদুক্তং শ্রীশঙ্করাচার্যপাদৈঃ, "অপি চ, অন্ত্যমিদং প্রমাণমাত্মৈকত্বস্য প্রতিপাদকং নাতঃ পরং কিঞ্চিদাকাঙ্ক্ষ্যমস্তি। যথা হি লোকে যজেতেত্যুক্তে কিং কেন কথমিত্যাকাঙ্ক্ষ্যতে, নৈবং 'তত্ত্বমসি', 'অহং ব্রহ্মাস্মি' ইত্যুক্তে কিঞ্চিদন্যদাকাঙ্ক্ষ্যমস্তি, সর্বাত্মৈকত্ববিষয়ত্বাবগতেঃ।" (ব্র.সূ.শা.ভা., নি.সা.সং.পৃ.৩৭৯) ইতি - "ন ধর্মজিজ্ঞাসায়ামিব শ্রুত্যাদয় এব প্রমাণং ব্রহ্মজিজ্ঞাসায়াং, কিন্তু শ্রুত্যাদয়োঽনুভবাদয়শ্চ যথাসম্ভবমিহ প্রমাণম্, অনুভবাবসানত্বাদ্ভূতবস্তুবিষয়ত্বাচ্চ ব্রহ্মবিজ্ঞানস্য।" (ব্র.সূ.শা.ভা., নি.সা.সং.পৃ.৫১-৫২) ইতি চ।

অপি চ, অনধিগতগন্তৃত্বং হি প্রমাণলক্ষণম্। মোক্ষস্তু নিত্যোঽধিগতস্বরূপ আত্মস্বরূপত্বাদেব। জীবস্য স্বাত্মস্বরূপং ব্রহ্মরূপমেব মোহমাত্রাবৃতং তিষ্ঠতি,

মোহনাশস্তু নৈব প্রত্যক্ষাদিনা ভবিতুমর্হতি, পরন্তু, শ্রুতিমহাবাক্যোত্থজ্ঞানাদেবেতি নাস্তি তত্র বাহ্যবস্তুগ্রাহকস্য প্রত্যক্ষাদিপ্রমাণস্য কাপ্যপেক্ষা, যতো হি প্রত্যক্ষাদিপ্রমাণং অত্রাসমর্থমেব, যোগ্যতাভাবাৎ ।

তস্মাৎ প্রত্যক্ষানুমানাদীনি প্রমাণানি নৈব মুক্তিসাধনানি ভবিতুমর্হন্তি-পরন্তু, শ্রুতিতত্ত্বমস্যাদিমহাবাক্যানাং শ্রবণমননাদিকং অত্রাঽবিদ্যানাশদ্বারা ব্রহ্মজ্ঞানায়ালং ভবতি । তেন চ মোক্ষার্থমপি তাদৃশং শ্রবণাদিকমুপযুজ্যতে, ন তু প্রত্যক্ষাদিকম্ । ব্রহ্মজ্ঞানমেব মোক্ষ ইতি ব্রহ্মজ্ঞানমেব অত্র সাক্ষাৎকারণম্ । কিন্তু, তথাত্বে, নৈব ব্রহ্মজ্ঞানমোক্ষয়োঃ কার্যকারণভাবঃ কথমপি শক্যঃ, মোক্ষে কার্যকারণাভাবাৎ, তথাত্বে হি মোক্ষস্যানিত্যত্বপ্রসক্তেঃ । যৎক্ষণমেব ব্রহ্মজ্ঞানং তৎক্ষণমেবাঽবিদ্যানিবৃত্তিস্তৎক্ষণমেব মোক্ষঃ । কার্যকারণভাবে কালিকং পৌর্বাপর্যমস্তি, অত্র তু পৌর্বাপর্যং নাস্তীত্যপি ব্রহ্মজ্ঞানমোক্ষয়োঃ কার্যকারণভাবে হেতুর্বদিতব্যঃ অতএব সিদ্ধং শ্রুতেরেব ব্রহ্মজ্ঞানে তথা মুক্তৌ প্রামাণ্যম্, ন তু প্রত্যক্ষাদেঃ ।

শ্রুতিবোধিতশুদ্ধব্রহ্মণোঽদ্বৈতস্বরূপং প্রাগেব প্রপঞ্চিতম্ । জীবপরয়োরৈক্য এব তৎ সম্ভবতীতি তদৈক্যং প্রদর্শনীয়ম্ । তদর্থমাত্মাঽনাত্মনোর্বিবেকোঽস্তি ন বেতি বিচারণীয়ম্ । এতদর্থং উত্তরাগ্রন্থঃ প্রারভ্যতে ।

## ॥ আত্মাঽনাত্মনোর্বিবেকঃ ॥

অদ্বৈতবেদান্তে ব্রহ্মৈব নিত্যং পারমার্থিকং বস্তু, তদেব চাত্মা, তদেব চ জীবস্য পারমার্থিকং রূপম্। তচ্চ ব্রহ্ম কালত্রয়াতিবর্তি ত্রিগুণাতীতমক্ষরং সর্বোপাধিবিবর্জিতং সচ্চিদানন্দরূপমদ্বয়ম্। ব্রহ্মভিন্নং নিখিলমিদং বিশ্বং সর্বমনাত্মৈব। ব্যাবহারিকদশায়ামাত্মাঽনাত্মনোরন্যোন্যাধ্যাসাদ্ ব্যবহারো নিরাবাধং সম্পদ্যতে। পারমার্থিকদশায়ান্তু শুদ্ধং ব্রহ্মৈবাবশিষ্যতে, নান্যৎ কিঞ্চন।

অদ্বৈতনয়ে ব্রহ্মৈবার্থাদাত্মৈব ত্রিকালাবাধিতং সৎ, তদ্ভিন্নং সর্বমাধ্যাসিকং মিথ্যাভূতম্। মায়ামেবাশ্রিত্য নিখিলমিদং জগদ্ব্রহ্মণি পরিকল্পিতং ভবতি, উৎপত্তিস্থিতিলয়াদিকঞ্চ পরিলক্ষ্যতে। সর্বমিদমবিদ্যাদৃষ্টেরেব ভবতি, ন তু বিদ্যাদৃষ্টেঃ। অতএব জগত উৎপত্তিস্থিতিলয়াদিকমবিদ্যাবুদ্ধিরেব মন্যতে, ন তু বিদ্যাসম্পন্নস্যৈবং দৃষ্টির্ভবতি। অতএব "যতো বা ইমানি ভূতানি জায়ন্তে। যেন জাতানি জীবন্তি। যৎপ্রয়ন্ত্যভিসংবিশন্তি।" (তৈ. উ. ৩।১) ইত্যাদিশ্রুত্যা যা সৃষ্টিঃ স্থিতিলয়শ্চ দর্শিতঃ, তৎসর্বমবিদ্যাপ্রভাবাদেব যুজ্যতে, নান্যথা।

ব্রহ্ম হি চিৎস্বরূপং সর্বব্যাপি নিত্যশুদ্ধবুদ্ধমুক্তস্বভাবকং শাশ্বতং সনাতনং সর্বোপাধিবিবর্জিতমেব প্রত্যগ্রূপম্। তদুক্তং, "নিত্যঃ শুদ্ধো বুদ্ধমুক্তস্বভাবঃ সত্যঃ সূক্ষ্মঃ সন্ বিভুশ্চাদ্বিতীয়ঃ। আনন্দাব্ধির্যঃ পরঃ সোঽহমস্মি প্রত্যগ্ধাতুর্নাত্র

সংশীতিরসি ॥" (সং. শা., অহমদাবাদ সং., পৃ. ১১৭, শ্লো. ১। ১৭৩) ইতি ।
তদেব কূটস্থং ব্রহ্ম নির্বিকারং দেশকালাদ্যপরিচ্ছিন্নমাত্মরূপং সর্বদেহেষু বিদ্যতে । তদাম্নাতং শ্বেতাশ্বতরোপনিষদি, "একো দেবঃ সর্বভূতেষু গূঢ়ঃ সর্বব্যাপী সর্বভূতান্তরাত্মা ।" (শ্বে. উ. ৬। ১১) ইতি ।

ব্রহ্মণঃ সর্বথৈবাবিনাশিত্বমবিকারিত্বঞ্চ, অন্যথা, তজ্জ্ঞানার্থং মুমুক্ষোঃ প্রবৃত্তিরেব ন স্যাৎ । ন হ্যনিত্যবস্তুজ্ঞানার্থং মুমুক্ষুঃ সর্বত্যাগী ভবতি । অনিত্যজ্ঞানেন চ তজ্জ্ঞানস্বরূপো মোক্ষোঽপ্যনিত্য এব স্যাৎ । ন চাপ্যনিত্যে মোক্ষে সর্বত্যাগিনো মুমুক্ষোঃ কথমপি প্রবৃত্তির্ভবিতুমর্হতি । কিঞ্চ, ব্রহ্মণোঽবিকারিত্বমবিনাশিত্বঞ্চ শ্রুত্যা ভূয়ো ভূয় উপদিষ্টম্ । ব্রহ্মণো বিকারিত্বে 'অবিকার্যোঽয়মুচ্যতে' ইত্যাদিস্মৃতিবিরোধঃ স্যাদেব । অতএব শঙ্করাচার্যপাদৈর্বিস্পষ্টমুক্তম্, "পুরুষো হি বিনাশহেত্বভাবাদবিনাশী, বিক্রিয়াহেত্বভাবাচ্চ কূটস্থনিত্যঃ । অতএব নিত্যশুদ্ধবুদ্ধমুক্তস্বভাবঃ ।" (ব্র. সূ. শা. ভা., নি. সা. সং. পৃ. ৮৭-৮৮) ইতি । ব্রহ্মভিন্নং সর্বমচিদ্বস্তু জড়মেবেতি বিনাশ্যেব । অতএব সর্বমিদমনাত্মৈব ।

ব্রহ্মৈব চাত্মা, আত্মা চ বিষয়ী, স চাঽস্মৎপ্রত্যয়গোচরঃ । বিশ্বমিদং সর্বমনাত্মা বিষয়ো যুষ্মৎপ্রত্যয়গোচরঃ । বি বিশেষেণ সিন্বন্তি অববধ্নন্তি স্বেন রূপেণ নিরূপণীয়ং কুর্বন্তীতি বিষয়াঃ । তত্র বিষয়বিষয়িণোস্তমঃপ্রকাশবত্তাদাত্ম্যাভাবলক্ষণবিরোধঃ । অতএবাত্মাঽনাত্মনোর্বিবেকঃ স্ফুটতর এব ।

আত্মা চ দৃগ্রূপঃ, দৃশ্যরূপশ্চানাত্মা। দেহেন্দ্রিয়মনোবুদ্ধ্যহঙ্কারনাম-রূপাদিকং সর্বমেব দৃগ্রূপাদাত্মনো ভিন্নমনাত্মস্বরূপমেব, দৃশ্যত্বাৎ। তদুক্তং নৈষ্কর্ম্যসিদ্ধিকৃদ্ভিঃ, "দৃশ্যত্বাদ্ঘটবদ্দেহো দেহবচ্চেন্দ্রিয়াণ্যপি। মনশ্চেন্দ্রিয়-বজ্জ্ঞেয়ং মনোবন্নিশ্চয়াদিমৎ ॥" (নৈ. সি., পু. সং., পৃ. ১৩৭, শ্লো. ৩।৫৪) ইতি। স্বয়ং দৃশিরূপ আত্মা সর্বসাক্ষিভূতশ্চানাত্মবিরুদ্ধ এব। উক্তঞ্চ তত্রৈব গ্রন্থে, "প্রাগসদ্যাতি পশ্চাৎ সৎ সচ্চ যায়াদসত্তথা। অনাত্মাভিজনং তৎ স্যাদ্বিপরীতঃ স্বয়ং দৃশিঃ ॥" (নৈ. সি., পু. সং., পৃ. ১৩৮, শ্লো. ৩।৫৫) ইতি।

অদ্বৈতনয়ে কার্যকারণয়োরনন্যত্বং স্বীকৃতং, কার্যে কারণমনুস্যূতমেব, যথা ঘটাদৌ মৃত্তিকাদিকম্। কারণে নামরূপাদিকং সমারোপ্য কার্যরূপেণ তদেব কারণং ব্যবহ্রিয়তে। সমারোপিতত্বেন তৎ কার্যং নৈব ত্রিকালাবাধিতং সদ্ভবিতুমর্হতি, পরন্তু, মিথ্যাবাধ্যাসিকম্, নামরূপাদৌ গতে তত্তৎকার্যং কারণরূপেণৈবাবতিষ্ঠতে। কারণঞ্চ কার্যাৎ পূর্বমাসীৎ, কার্যকালে আসীৎ, কার্যনাশেঽপি স্যাদেবেতি কারণস্যৈব সত্যত্বং, কার্যস্য চ মৃষাত্মকত্বম্। অতএব কার্যং মিথ্যাভূতং বাচারম্ভণমাত্রম্। তদাম্নাতং ছান্দোগ্যে, "বাচারম্ভণং বিকারো নামধেয়ং মৃত্তিকেত্যেব সত্যম্" (ছা. উ. ৬।১।৪) ইতি। তত্র চ কার্যকারণয়োরনন্যত্বং নাম নৈব কার্যকারণয়োরভেদঃ, কিন্তু, বস্তুগত্যা,

ভেদনিষেধ এব । তদুক্তং ভামতীকৃদ্ভির্বাচস্পতিমিশ্রপাদৈঃ, "অনন্যত্বমিতি নাভেদং ব্রূমঃ, কিন্তু ভেদং ব্যাসেধামঃ ।" (ভা. ব্র. সূ., নি. সা. সং., পৃ. ৩৭৩) ইতি । অতএব কারণস্যৈব কার্যসত্তা । তেন ব্রহ্মণো জগৎকারণত্বাদ্ব্রহ্মণৈব জগৎসত্তা, ব্রহ্মণঃ সর্বত্রানুস্যূতত্বাৎ । জগচ্চ মিথ্যৈব বিকারভূতং বিনাশি । তদুক্তং শঙ্করাচার্যপাদৈঃ "সর্বঞ্চ নামরূপাদি সদাত্মনৈব সত্যং বিকারজাতং, স্বতস্ত্বনৃতমেব" (শা. ভা. ছা. উ. ৬।৩।২, বারাণসী সং, পৃ. ৫১৩) ইতি । এতৎ সর্বং 'তদনন্যত্বমারম্ভণশব্দাদিভ্যঃ' (ব্র. সূ. ২।১।১৪) ইত্যাদিসূত্রে বাদরায়ণপাদৈর্বিস্পষ্টমুক্তম্, ব্যাখ্যাতঞ্চ শাঙ্করভাষ্যে, ভামতীটীকাদৌ চ ।

আত্মা সর্বব্যাপী বিভুশ্চিদ্রূপ এব । অনাত্মা তু জড়ভূত উপাধিপরিচ্ছিন্নঃ । অতএবানয়োর্মহান্ বিবেকঃ । উপলভ্যমানস্য জগতো ব্যাবহারিকসত্ত্বং স্বীকৃতং, ন তু পারমার্থিকসত্ত্বং, তত্র যোগ্যতাভাবাদেব । আত্মস্বরূপং ব্রহ্মৈব পারমার্থিকং সৎ, নান্যৎ কিঞ্চন । ব্রহ্মাদিস্তম্বপর্যন্তং যাবদ্বস্তু সর্বং ব্রহ্মণি সমারোপিতমাবিদ্যকমনাত্মভূতমেব । বিদ্যারণ্যপাদৈস্তস্য পঞ্চদশীগ্রন্থে এবমেব ভূয়ো ভূয়ঃ প্রতিপাদিতম্ । তদুক্তং, "ব্রহ্মাদ্যাঃ স্তম্বপর্যন্তাঃ প্রাণিনোঽত্র জড়া অপি । উত্তমাধমভাবেন বর্তন্তে পটচিত্রবৎ ॥" (প. দ., কলি. সং., পৃ. ৬২, শ্লো. ৬।৫) ইত্যাদিকম্ ।

'অসঙ্গো হ্যয়ং পুরুষঃ' [বৃ. উ. ৪।৩] ইত্যাদিশ্রুত্যা ব্রহ্মণোঽসঙ্গত্বং জ্ঞায়তে। প্রমাতৃত্বকর্তৃত্বভোক্তৃত্বাদিকং কিমপ্যস্মিন্ ব্রহ্মাত্মনি ন যুজ্যতে, অবিদ্যাবশাদেব জীবঃ প্রমাতৃত্বাদিকং ব্রহ্মণি সমারোপ্যানুভবতি। সাক্ষিভূত আগমাপায়িত্বরহিতঃ শব্দরূপাদিশূন্য আত্মা নৈব দৃশ্যত্বাগমাপায়িত্বরূপাদিমত্ত্বমনাত্মধর্মং সমশ্নুতে। তদুক্তং নৈষ্কর্ম্যসিদ্ধিকৃদ্ভিঃ, "দিদৃক্ষিতপরিচ্ছিন্নপরাগ্রূপাদিসংশ্রয়াৎ। বিপরীতমতো দৃষ্ট্যা স্বতো বুদ্ধং ন পশ্যতি ॥" [নৈ. সি. পু. সং., পৃ. ২৩৫। শ্লো. ৩।৪৯] ইতি।

অত্র 'ন দ্রষ্টের্দ্রষ্টারং পশ্যেঃ' [বৃ. উ. ৩।৪।২] ইতি, 'ন হি দ্রষ্টুর্দৃষ্টের্বিপরিলোপো বিদ্যতে' [বৃ. উ. ৪।৩।২৩] ইতি, 'কেন কং বিজানীয়াৎ' [বৃ. উ. ৪।৫।১৫] ইত্যাদিশ্রুতেশ্চাত্মনঃ সর্বপ্রমাণাতিবৃত্তত্বং জ্ঞায়তে। তদুক্তং, "ন্যায়সিদ্ধমতো বক্তি দ্রষ্টের্দ্রষ্টারমাত্মনঃ। ন পশ্যেৎ প্রত্যগাত্মানং প্রমাণং শ্রুতিরাদরাৎ ॥" [নৈ. সি., পু. সং., পৃ. ১৩৬, শ্লো. ৩।৫০] ইতি। অনাত্মা তু দৃশ্যরূপপ্রত্যক্ষাদিপ্রমাণগম্যঃ। তেনাপ্যাত্মাঽনাত্মনোরস্তি মহান্ বিবেকঃ।

বস্তুতস্তু, আত্মাঽনাত্মনোর্বিবেককথৈব ন ভবিতুমর্হতি, আত্মনঃ পারমার্থিকত্বাদনাত্মনস্তু ব্যাবহারিকত্বাৎ। আত্মনঃ পারমার্থিকং প্রামাণ্যম্, অনাত্মনস্তু ব্যাবহারিকম্। অতএব তয়োর্বিবেকস্তমঃপ্রকাশবৎ স্ফুটতর এবেতি তদ্বিবেকপ্রদর্শনার্থং যত্নং নাবশ্যকম্। তথাপি মিথ্যাঽজ্ঞাননিমিত্তঃ সত্যানৃতে

মিথুনীকৃত্যাত্মানাত্মনোরবিবেকমেব কৃত্বা লোকব্যবহারোঽবিবাদং প্রবর্ত্তি । তদর্থমেতদ্বিবেকপ্রদর্শনমাবশ্যকমেব । "নিগড়ে হি নির্জ্ঞাতে নিগড়িতস্য মোক্ষায় যত্নঃ কর্তব্যো ভবতি ।" (বৃ.উ.শা.ভা., বারাণসী সং., পৃ.৭৯২) ইতি নিগড়স্বরূপং কথনীয়মেব । তদেব কৃতং শঙ্করাচার্যপাদৈরধ্যাসভাষ্যে ।

অপি চ, ভেদো নাম পারমার্থিকং কিমপি বস্তু নাস্তি, ভেদবুদ্ধেরা-বিদ্যকত্বেন মিথ্যাত্বাৎ । ভেদস্য স্বরূপাদিকং প্রমাণাদিনাপি শ্রুত্যাদিভিরপি চ নৈব সিধ্যতীতি ভেদো ন গ্রাহ্যঃ । তেন পরমার্থদৃষ্ট্যাঽঽত্মানাত্মনোর্বিবেকো ন যুজ্যতে, অনাত্মন আবিদ্যকত্বেনাপারমার্থ্যাৎ । তদুক্তং গৌড়পাদাচার্যৈঃ, "মায়ামাত্রমিদং দ্বৈতমদ্বৈতং পরমার্থতঃ ।" (মা.কা.৩। ১০) ইত্যাদিকম্ ।

অত্রাত্মানাত্মনোর্বিবেকবিচারেণ কিং ফলং লভ্যতে, কা বা তৎফলস্যাবশ্যকতেতি প্রদর্শনীয়মস্মাভিঃ, অন্যথৈতাদৃশবিবেকবিচারস্য বৈফল্যমাপদ্যেত, পারমার্থিকতত্ত্বজ্ঞানস্য বা কিং ফলমিত্যপি প্রদর্শনীয়মিত্যত উত্তরো গ্রন্থঃ সমারভ্যতে ।

## ॥ পরমার্থতত্ত্বজ্ঞানস্য ফলম্ ॥

জীবঃ স্বরূপতঃ পারমার্থিকদৃষ্ট্যা ব্রহ্মরূপ এব । কিন্তু অবিদ্যাপ্রভাবিতঃ সন্ স জীবঃ স্বাত্মস্বরূপমনুপলভ্যাত্মানাত্মনোরবিবেকং কৃত্বা 'অহমিদং মমেদম্'-ইত্যাদিরূপেণাবিদ্যকমাধ্যাসিকঞ্চ ব্যবহারং করোতি । তাদৃশশ্চ ব্যবহার আব্রহ্মজ্ঞানং তিষ্ঠতীতি সর্বং প্রাগুক্তেষু গ্রন্থেষু প্রপঞ্চিতম্ । আত্মানাত্মনো-র্বিবেকং কৃত্বা অত্রাত্মন্যেবাত্মানং সমর্প্য তত্রৈব চ মনো নিধায়ানাত্মচিন্তাঞ্চ পরিত্যজ্য যোগ্যশ্রবণাদৌ কৃতে জীবস্য ব্রহ্মজ্ঞানং স্ফুরতি । তচ্চ ব্রহ্মজ্ঞানমেব মোক্ষঃ । অত্র ব্রহ্মজ্ঞানমোক্ষয়োঃ কার্যকারণভাবো নাস্তি, যৎক্ষণমেব ব্রহ্মজ্ঞানং তৎক্ষণমেবাবিদ্যানিবৃত্তিস্তৎক্ষণমেব চ মোক্ষো জীবন্মুক্তিরূপো বিদেহকৈবল্যরূপো বা । তৎক্ষণমেব প্রারব্ধক্ষয়ে বিদেহকৈবল্যলাভঃ, প্রারব্ধাক্ষীণে তু দেহধারণং জীবন্মুক্তিশ্চেতি প্রাগেব প্রপঞ্চিতম্ ।

এতন্মোক্ষফললাভার্থ এব পরমার্থতত্ত্ববিচারঃ, আত্মানাত্মনোর্বিবেকা-দিবিচারশ্চাবশ্যকঃ । অত্র মোক্ষো জীবপরয়োরৈক্যরূপব্রহ্মজ্ঞানস্য ফলমিত্য-দ্বৈতিনাং রাদ্ধান্তঃ । যথৈব স্বপ্রবোধং বিনা নৈব স্বস্বপ্নো নিরাকৃতো ভবতি তথৈব স্বস্বরূপং ব্রহ্মজ্ঞানং বিনা নৈব স্বাজ্ঞাননাশো ভবতি, মোক্ষশ্চ ন ভবত্যেব । তদুক্তং পঞ্চদশ্যাম্, "মুক্তিস্তু ব্রহ্মতত্ত্বস্য জ্ঞানাদেব ন চান্যথা । স্বপ্রবোধং বিনা নৈব স্বস্বপ্নো হীয়তে যথা ॥" (প.দ., কলি.সং.পৃ. ১৩৬, শ্লো.৬।২১০) ইতি ।

স চ মোক্ষো জন্মমৃত্যুরহিতঃ পরমানন্দরূপঃ স্বস্বরূপাবস্থানমেব। স চ ব্রহ্মস্বরূপলাভঃ। তদাম্নাতং মুণ্ডকে, "ব্রহ্ম বেদ ব্রহ্মৈব ভবতি" (মু. উ. ৩।২।৯)। তত্র 'তমেব বিদিত্বাতিমৃত্যুমেতি নান্যঃ পন্থা বিদ্যতেঽয়নায়' (শ্বে. উ. ৩।৮) ইতি, 'বিদ্বান্ নামরূপাদ্বিমুক্তঃ' (মু. উ. ৩।২।৮), 'তরতি শোকমাত্মবিৎ' (ছা. উ. ৭।১।৩) ইত্যাদিশ্রুতিশ্চ প্রমাণম্। ব্রহ্মজ্ঞানে সতি তদ্বিষয়াঽজ্ঞাননিবৃত্তৌ মোক্ষ ইত্যদ্বৈতিনামাঘোষঃ/ স চ মোক্ষো নৈব ব্রহ্মজ্ঞানকার্যম্, অবিদ্যানিবৃত্ত্যুপলক্ষিতস্যাত্মন এব মোক্ষরূপত্বাৎ, জ্ঞানেন হি প্রাপ্তস্যৈবাত্মবস্তুনঃ প্রাপ্তিঃ, কণ্ঠগত-বিস্মৃতচামীকরপ্রাপ্তিবৎ। তদুক্তং সুরেশ্বরাচার্যৈঃ, "নিবৃত্তে তজ্জ্ঞানতোঽলব্ধং কণ্ঠে চামীকরং যথা। বর্জিতং চ স্মৃতো ভ্রান্ত্যা ছায়ায়ামাত্মনো যথা॥" (নৈ. সি., পু. সং., পৃ. ২২, শ্লো. ১।৩১) ইতি।

মোক্ষদশায়াং নিরতিশয়সুখাবাপ্তিঃ শোকমোহাদিনিবৃত্তিশ্চ ভবতি। নিরতিশয়সুখত্বঞ্চ ব্রহ্মৈব পরমানন্দরূপম্, 'আনন্দো ব্রহ্মেতি ব্যজানাৎ' (তৈ. উ. ৩।৬), 'বিজ্ঞানমানন্দং ব্রহ্ম' (বৃ. উ. ৩।৯।২৮) ইত্যাদিশ্রুতেঃ।

অবিদ্যাভিভূতো জীবঃ স্বাত্মস্বরূপং ব্রহ্মরূপং ন জানাতি, যোগ্যশ্রবণাদিনা তত্ত্বজ্ঞানোদয়েনাঽজ্ঞাননিবৃত্তৌ স্বস্বরূপস্যাত্মভূতস্য জীবপরয়োরৈক্যরূপস্য স্ফুরণং ভবতি। তচ্চ স্ফুরণং ব্রহ্মপ্রাপ্তিঃ, স এব মোক্ষঃ, নিত্যানন্দব্রহ্মস্বরূপঃ।

এবং মোক্ষপ্রাপ্তস্য ব্রহ্মবিদঃ 'ন চ পুনরাবর্ত্ততে' [ছা.উ.৮।১৫।১] ইত্যাদিশ্রুত্যা 'পুনরপি জননং পুনরপি মরণং পুনরপি জননীজঠরে শয়নং' নৈব ভবতি। আত্যন্তিকীসংসারনিবৃত্তিরেব মোক্ষঃ। তদুক্তং ব্রহ্মসিদ্ধিকৃদ্ভিঃ, "আত্যন্তিকী চ সংসারনিবৃত্তির্মোক্ষ ইত্যুচ্যতে।" [ব্র.সি., মা.সং., পৃ.৭৮] ইতি। সংসারশ্চ শোকমোহাদ্যুপেতঃ শোকমোহাদ্যূর্মিষট্কসমন্বিত এব।

'অহংমমা'দিযাবদ্ব্যবহার আধ্যাসিক এবাজ্ঞানমূলকো ব্রহ্মজ্ঞানমৃতে সংসারদশায়াং প্রসরতি। অদ্বয়কূটস্থচৈতন্যরূপং স্বাত্মানং প্রবুদ্ধ্বা জীবো যদানুভবতি, তদা তস্য তাদৃশঃ সর্বো ব্যবহারঃ সমুচ্ছিদ্যতে। তত্ত্বজ্ঞানোদয়ে হ্যজ্ঞাননাশাত্তৎকৃতাহংমমাদিবুদ্ধের্নাশো হ্যবশ্যমেব ভবতি। তত্ত্বজ্ঞানে জাতে চ নৈব দ্বৈতং কিমপি স্থাতুমর্হতি, আতত্ত্বজ্ঞানমেব হি যাবদ্দ্বৈতব্যবহারাৎ। তদুক্তং মাণ্ডূক্যকারিকায়াং, "জ্ঞাতে দ্বৈতং ন বিদ্যতে" [মা.কা.১।১৮] ইতি। বৃহদারণ্যকভাষ্যবার্ত্তিকে হ্যপ্যুক্তং সুরেশ্বরাচার্যৈঃ, "যথোচ্ছিন্নাত্মমোহস্য নিবৃত্তাবপি নিবৃত্তিঃ। এবং প্রাগাত্মসম্বোধাদদ্বৈতৈকাত্ম্যনিবৃতিঃ ।।", "কাকোলূকনিশেবায়ং সংসারোঽজ্ঞাত্মবেদিনোঃ। যা নিশা সর্বভূতানামিত্যবোচৎ স্বয়ং হরিঃ" ।[বৃ.ভা.বা., বারাণসী সং, পৃ.৩২৯-৩০ শ্লো.১।৪।৩১২-১৩] ইতি। নৈষ্কর্ম্যসিদ্ধাবপ্যুক্তং তৈঃ, "আ প্রবোধাদ্ যথা সিদ্ধির্দ্বৈতাদন্যস্য বস্তুনঃ।

বোধাদেবমসিদ্ধত্বং বুদ্ধ্যাদেঃ প্রত্যগাত্মনঃ ॥" (নৈ. সি., পু. সং., পৃ. ১৯৫, শ্লো. ৪।৫০) ইতি। কিঞ্চ, শোকমোহাদ্যুপেতস্য সংসারিস্যাবিদ্যকত্বেনা-সিদ্ধত্বে দ্বৈতসিদ্ধিরেব পারমার্থিকীত্যায়াতম্। অদ্বৈতাত্মতত্ত্বজ্ঞস্তু ব্যাবহারিকদৃষ্ট্যা লৌকিকং ব্যবহারং কৃত্বাপি ন তত্র বদ্ধো ভবতি, গুরুশিষ্যাদিব্যবহারশ্চ তস্য নিরাবাধং তিষ্ঠতি। 'আচার্যবান্ পুরুষো বেদ' (ছা. উ. ৬।১৪।২) ইত্যাদিশ্রুতি-রেতাদৃশং ব্যবহারং বোধয়তি। তত্র নৈষ্কর্ম্যসিদ্ধিকৃদ্ভিরপ্যুক্তম্, "সর্বমেবানু-জানাতি সর্বমেব নিষেধতি। ভেদাত্মলাভোঽনুজ্ঞা স্যান্নিষেধোঽতৎস্বভাবতঃ ॥" (নৈ. সি., পু. সং., পৃ. ১৯৫, শ্লো. ৪।৫১) ইতি।

অদ্বৈতাত্মতত্ত্বজ্ঞানেন সংসারাদিবন্ধহেত্ববিদ্যানাশাত্তৎকার্যভূতসর্বকর্মো-চ্ছেদো ভবতি বিনা প্রারব্ধং, 'ক্ষীয়ন্তে চাস্য কর্মাণি তস্মিন্ দৃষ্টে পরাবরে' (মু. উ. ২।২।৮) ইত্যাদিশ্রুতেঃ, 'জ্ঞানাগ্নিঃ সর্বকর্মাণি ভস্মসাৎ কুরুতেঽর্জুন।' (গী. ৪।৩৭) ইত্যাদিস্মৃতেশ্চ। ব্রহ্মসিদ্ধিকৃদ্ভিরত্রোক্তং, "কর্মক্ষয়াভ্যুপগমে তত্ত্বদর্শন-সমনন্তরমেব মুক্তিঃ স্যাৎ, ন দেহপাতপ্রতীক্ষা।" (ব্র. সি., মা. সং., পৃ. ১২৯) ইত্যাদিকম্। ভোগেনৈব প্রারব্ধক্ষয়াৎ পরমার্থতত্ত্বজ্ঞানেন বর্তমানদেহারম্ভকপ্রারব্ধকর্মা-তিরিক্তসঞ্চিতক্রিয়মাণকর্মণাং নাশো ভবতি। তদুক্তং শঙ্করাচার্যপাদৈঃ, "সামর্থ্যাদ্ যেন কর্মণা শরীরমারব্ধং তৎপ্রবৃত্তফলত্বাদুপভোগেনৈব ক্ষীয়তেঽতা

যান্যপ্রবৃত্তফলানি জ্ঞানোৎপত্তেঃ প্রাক্কৃতানি জ্ঞানসহভাবীনি চাতীতানেক-জন্মকৃতানি চ তান্যেব কর্মাণি ভস্মসাৎ কুরুতে" (গী. ভা., কলিকাতা সং., পৃ. ৩০৬) ইতি। অদ্বৈতসিদ্ধিকৃদ্ভিরপ্যুক্তম্, "জীবন্মুক্তশ্চ তত্ত্বজ্ঞানেন নিবৃত্তাঽবিদ্যাঽপ্যনুবৃত্তদেহাদিপ্রতিভাসঃ। ন চ তত্ত্বজ্ঞানাদবিদ্যানাশে সদ্যঃ শরীরপাতাপত্তিঃ, নিবৃত্তেঽপি ভ্রমস্যাপি সংস্কারাদ্ভয়কম্পানুবৃত্তিবৎ"...(অ. সি., দি. সং., পৃ. ৮৯০) ইত্যাদিকম্।

'তস্য তাবদেব চিরং যাবন্ন বিমোক্ষ্যেঽথ সম্পৎস্যে' (ছা. উ. ৬। ১৪। ২) ইত্যাদিশ্রুতিরপ্যত্রাঽহ প্রারব্ধক্ষয়ং ব্রহ্মবিদো দেহধারণমুপদিশতি। যাবচ্চ ব্রহ্মবিদো জীবন্মুক্তস্য প্রারব্ধক্ষয়ার্থং দেহধারণং তাবত্তস্য দগ্ধবীজবন্নৈব কর্মবন্ধানুবৃত্তিঃ। তাদৃশমুক্তস্য ব্রহ্মবিদো দেহধারণপ্রয়োজনাভাবেঽপি প্রারব্ধফলভোগার্থং শরীরধারণং, মুক্তেষুবদ্বেগক্ষয়পর্যন্তম্, আপ্রারব্ধক্ষয়ং ভবতি। অত এব চ, গুরুশিষ্যাদিব্যবস্থাপি যুজ্যতে, 'আচার্যবান্ পুরুষো বেদ' ইত্যাদিশ্রুতিরপি ন বিফলতাং ব্রজতি। প্রারব্ধক্ষয়ে সতি শরীরপাতাজ্জীবন্মুক্তস্য বিদেহকৈবল্যম্। তদুক্তং মুক্তিকোপনিষদি, "জীবন্মুক্তপদং ত্যক্ত্বা স্বদেহে কালসাৎ কৃতে। বিশত্যদেহমুক্তত্বং পবনোঽস্পন্দতামিব।" (মুক্তিকোপনিষৎ ২।৭৬) ইতি। বিদেহকৈবল্যলাভ এব পরমামুক্তির্নিখিলবন্ধনাশরূপা। বিদেহমুক্তস্যাত্মনো নিষ্কলব্রহ্মরূপেণাবস্থানমেব। বিদেহমুক্তাত্মা ব্রহ্মরূপতামেত্য

ব্রহ্মানন্দরূপং নিত্যং সুখমবাপ্নোতি । তদাম্নাতং তেজবিন্দূপনিষদি, 'ব্রহ্মভূতঃ প্রশান্তাত্মা ব্রহ্মানন্দময়ঃ সুখী । স্বচ্ছরূপো মহামৌনো বৈদেহো মুক্ত এব সঃ ॥' [তে. উ. ৪। ৩৩] ইত্যাদিকম্ ।

অতএব পরমার্থতত্ত্বজ্ঞানফলং মুক্তিরেব পরমানন্দরূপা সর্ববন্ধবিনির্মুক্তা । জ্ঞানাদেব মুক্তিঃ, ন তু কর্মাদিনেত্যত্রাদ্বৈতিনামৈকমত্যমস্তি । তদুক্তং পঞ্চদশ্যাম্ "জ্ঞানাদেব তু কৈবল্যমিতি শাস্ত্রেষু ডিণ্ডিমঃ ॥" (প. দ., কলি. সং. পৃ. ২৮, শ্লো. ৯। ৯৭) ইত্যাদিকম্ ।

বস্তুতস্তু, বন্ধমোক্ষব্যবস্থা ব্যবহারদৃষ্ট্যৈব, ন তু পারমার্থিকদৃষ্ট্যে-ত্যপ্যত্র লক্ষ্যম্ । পরমাত্মনো বন্ধমুক্ত্যাদ্যবস্থায়াং স্বীকৃতায়াং বিকারিত্বপ্রসঙ্গো দুর্বার এব স্যাৎ, তচ্চ নাভ্যুপগম্যতে, ন বা শ্রুতিসম্মতম্ । তদুক্তং গৌড়পাদা-চার্যৈঃ, "ন নিরোধো ন চোৎপত্তির্ন বদ্ধো ন চ সাধকঃ । ন মুমুক্ষুর্ন বৈ মুক্ত ইত্যেষা পরমার্থতা ॥" [মা. কা. ২। ৩২] ইতি ।

এতাবতা ব্রহ্মজ্ঞানেনাবিদ্যকসর্বানর্থনাশাৎ পরমা মুক্তির্ভবতীত্যায়াতম্ । তথাত্বে চ, জন্মমরণাদিনাশাজ্জীবস্য স্বরূপপ্রাপ্তৌ সর্বক্লেশনাশঃ । তদুক্তং পঞ্চদশ্যাম্, "ব্রহ্মানন্দং প্রবক্ষ্যামি জ্ঞাতে তস্মিন্নশেষতঃ । ঐহিকামুষ্মিকানর্থব্রাতং হিত্বা সুখায়তে ॥" (প. দ., কলি. সং., পৃ. ৩০১, শ্লো. ১১। ১) ইত্যাদিকম্ ।

অত্র তু ফলশব্দেন কার্যকারণভাবেন কার্যং ন বোধ্যম্। ব্রহ্মজ্ঞানমোক্ষয়োঃ কার্যকারণভাবে স্বীকৃতে মোক্ষস্যানিত্যত্বপ্রাপ্তির্দুর্বারৈব ভবেৎ। ন হি কার্যকারণভাববদ্ ব্রহ্মজ্ঞানমোক্ষয়োঃ পৌর্বাপর্যং কিমপ্যস্তীতি ন তয়োঃ কার্যকারণভাবঃ। তেন তত্র কালিকব্যবধানং ন কিমপ্যস্তীত্যত্র বেদ্যম্।

অত্র মোক্ষস্বরূপবিষয়ে মতবৈচিত্র্যং কিঞ্চিৎ পরিলক্ষ্যতে। তদ্বৈচিত্র্যপ্রদর্শনেনাঽদ্বৈতমতত্ত্বপ্রতিষ্ঠাপনার্থং প্রযতনং কার্যমিত্যত উত্তরা গ্রন্থসুখোত্তরাঽধ্যায়শ্চারভ্যতে।

॥ ইতি সমাপ্তোঽয়ং তৃতীয়োঽধ্যায়ঃ ॥